श्री महालक्ष्मी स्तव कवच पूजा

श्रीगणेशाय नमः ।

नारद उवाच ।
आविर्भूय हरिस्तस्मै किं स्तोत्रं कवचं ददौ ।
महालक्ष्म्याश्च लक्ष्मीशस्तन्मे ब्रूहि तपोधन ॥1॥

नारायण उवाच ।
पुष्करे च तपस्तप्त्वा विरराम सुरेश्वरः ।
आविर्बभूव तत्रैव क्लिष्टं दृष्ट्वा हरिः स्वयं ॥ 2॥

तमुवाच हृषीकेशो वरं वृणु यथेप्सितं ।
स च वव्रे वरं लक्ष्मीमीशस्तस्मै ददौ मुदा ॥ 3॥

वरं दत्त्वा हृषीकेशः प्रवक्तुमुपचक्रमे ।
हितं सत्यं च सारं च परिणामसुखावहं ॥ 4॥

मधुसूदन उवाच ।
गृहाण कवचं शक्र सर्वदुःखविनाशनं ।
परमैश्वर्यजनकं सर्वशत्रुविमर्दनं ॥ 5॥

ब्रह्मणे च पुरा दत्तं विष्टपे च जलप्लुते ।
यद्धृत्वा जगतां श्रेष्ठः सर्वैश्वर्ययुतो विधिः ॥ 6॥

बभूवुर्मनवः सर्वे सर्वैश्वर्ययुता यतः ।
सर्वैश्वर्यप्रदस्यास्य कवचस्य ऋषिर्विधिः ॥ 7॥

पंक्तिश्छंदश्च सा देवी स्वयं पद्मालया वरा ।
सिद्ध्यैश्वर्यसुखेष्वेव विनियोगः प्रकीर्तितः ॥ 8॥

यद्धृत्वा कवचं लोकः सर्वत्र विजयी भवेत् ।
मस्तकं पातु मे पद्मा कंठं पातु हरिप्रिया ॥ 9॥

नासिकां पातु मे लक्ष्मीः कमला पातु लोचने ।
केशान्केशवकांता च कपालं कमलालया ॥ 10॥

जगत्प्रसूर्गंडयुग्मं स्कंधं संपत्प्रदा सदा ।
ॐ श्रीं कमलवासिन्यै स्वाहा पृष्ठं सदाऽवतु ॥ 11॥

ॐ ह्रीं श्रीं पद्मालयायै स्वाहा वक्षः सदाऽवतु ।
पातु श्रीर्मम कंकालं बाहुयुग्मं च ते नमः ॥ 12॥

ॐ ह्रीं श्रीं लक्ष्म्यै नमः पादौ पातु मे संततं चिरं ।
ॐ ह्रीं श्रीं नमः पद्मायै स्वाहा पातु नितंबकं ॥ 13॥

ॐ श्रीं महालक्ष्म्यै स्वाहा सर्वांगं पातु मे सदा ।
ॐ ह्रीं श्रीं क्लीं महालक्ष्म्यै स्वाहा मां पातु सर्वतः ॥ 14॥

इति ते कथितं वत्स सर्वसंपत्करं परं ।
सर्वैश्वर्यप्रदं नाम कवचं परमाद्भुतं ॥ 15॥

गुरुमभ्यर्च्य विधिवत्कवचं धारयेत्तु यः ।
कंठे वा दक्षिणे बाहौ स सर्वविजयी भवेत् ॥ 16॥

महालक्ष्मीर्गृहं तस्य न जहाति कदाचन ।
तस्यच्छायेव सततं सा च जन्मनि जन्मनि ॥ 17॥

इदं कवचमज्ञात्वा भजेल्लक्ष्मीं स मंदधीः ।
शतलक्षप्रजापेऽपि न मंत्रः सिद्धिदायकः ॥ 18॥

नारायण उवाच ।
दत्त्वा तस्मै च कवचं मंत्रं वै षोडशाक्षरं ।
संतुष्टश्च जगन्नाथो जगतां हितकारणं ॥ 19॥

ॐ ह्रीं श्रीं क्लीं नमो महालक्ष्म्यै स्वाहा ।
ददौ तस्मै च कृपया चेंद्राय च महामुने ॥ 20॥

ध्यानं च सामवेदोक्तं गोपनीयं सुदुर्लभं ।
सिद्धैर्मुनींद्रैर्दुष्प्राप्यं ध्रुवं सिद्धिप्रदं शुभं ॥ 21॥

श्वेतचंपकवर्णाभां शतचंद्रसमप्रभां ।
वह्निशुद्धांशुकाधानां रत्नभूषणभूषितां ॥ 22॥

ईषद्धास्यप्रसन्नास्यां भक्तानुग्रहकारिकां ।
कस्तूरीबिंदुमध्यस्थं सिंदूरं भूषणं तथा ॥ 23॥

अमूल्यरत्नरचितकुंडलोज्ज्वलभूषणं ।
बिभ्रती कबरीभारं मालतीमाल्यशोभितं ॥ 24॥

सहस्रदलपद्मस्थां स्वस्थां च सुमनोहरां ।
शांतां च श्रीहरेः कांतां तां भजेज्जगतां प्रसूं ॥ 25॥

ध्यानेनानेन देवेंद्रो ध्यात्वा लक्ष्मीं मनोहरां ।
भक्त्या संपूज्य तस्यै च चोपचारांस्तु षोडश ॥ 26॥

स्तुत्वाऽनेन स्तवेनैव वक्ष्यमाणेन वासव ।
नत्वा वरं गृहीत्वा च लभिष्यसि च निर्वृतिं ॥ 27॥

स्तवनं शृणु देवेंद्र महालक्ष्म्याः सुखप्रदं ।
कथयामि सुगोप्यं च त्रिषु लोकेषु दुर्लभं ॥ 28॥

नारायण उवाच ।
देवि त्वां स्तोतुमिच्छामि न क्षमाः स्तोतुमीश्वराः ।
बुद्धेरगोचरां सूक्ष्मां तेजोरूपां सनातनीं ।
अत्यनिर्वचनीयां च को वा निर्वक्तुमीश्वरः ॥ 29॥

स्वेच्छामयीं निराकारां भक्तानुग्रहविग्रहां ।
स्तौमि वाङ्मनसोः पारां किंवाऽहं जगदंबिके ॥ 30॥

परां चतुर्णां वेदानां पारबीजं भवार्णवे ।
सर्वसस्याधिदेवीं च सर्वासामपि संपदां ॥ 31॥

योगिनां चैव योगानां ज्ञानानां ज्ञानिनां तथा ।
वेदानां वै वेदविदां जननीं वर्णयामि किं ॥ 32॥

यया विना जगत्सर्वमबीजं निष्फलं ध्रुवं ।
यथा स्तनंधयानां च विना मात्रा सुखं भवेत् ॥ 33॥

प्रसीद जगतां माता रक्षास्मानतिकातरान् ।
वयं त्वच्चरणांभोजे प्रपन्नाः शरणं गताः ॥ 34॥

नमः शक्तिस्वरूपायै जगन्मात्रे नमो नमः ।
ज्ञानदायै बुद्धिदायै सर्वदायै नमो नमः ॥ 35॥

हरिभक्तिप्रदायिन्यै मुक्तिदायै नमो नमः ।
सर्वज्ञायै सर्वदायै महालक्ष्म्यै नमो नमः ॥ 36॥

कुपुत्राः कुत्रचित्संति न कुत्रापि कुमातरः ।
कुत्र माता पुत्रदोषं तं विहाय च गच्छति ॥ 37॥

स्तनंधयेभ्य इव मे हे मातर्देहि दर्शनं ।
कृपां कुरु कृपासिंधो त्वमस्मान्भक्तवत्सले ॥ 38॥

इत्येवं कथितं वत्स पद्मायाश्च शुभावहं ।
सुखदं मोक्षदं सारं शुभदं संपदः प्रदं ॥ 39॥

इदं स्तोत्रं महापुण्यं पूजाकाले च यः पठेत् ।
महालक्ष्मीर्गृहं तस्य न जहाति कदाचन ॥ 40॥

इत्युक्त्वा श्रीहरिस्तं च तत्रैवांतरधीयत ।
देवो जगाम क्षीरोदं सुरैः सार्धं तदाज्ञया ॥ 41॥

॥ इति श्रीब्रह्मवैवर्तमहापुराणे गणपतिखंडे
नारदनारायणसंवादे लक्ष्मीस्तवकवचपूजाकथनं
नाम द्वाविंशोऽध्यायः ॥ 22॥